# বুধস্তোত্রম্

{॥ বুধস্তোত্রম্ ॥}

অথ বুধস্তোত্রম্ ।

অস্য শ্রীবুধস্তোত্রমহামন্ত্রস্য বসিষ্ঠ ঋষিঃ । অনুষ্টুপ্ছন্দঃ ।

বুধো দেবতা । বুধপ্রীত্যর্থে জপে বিনিয়োগঃ ।

ধ্যানম্ ।

ভুজৈশ্চতুর্ভির্বরদাভযাসিগদং বহন্তং সুমুখং প্রশান্তম্ ।

পীতপ্রভং চন্দ্রসুতং সুরেঢ্যং সিংহে নিষণ্ণং বুধমাশ্রযামি ॥

পীতাম্বরঃ পীতবপুঃ পীতধ্বজরথস্থিতঃ ।

পীযূষরশ্মিতনযঃ পাতু মাং সর্বদা বুধঃ ॥ ১॥

সিংহবাহং সিদ্ধনুতং সৌম্যং সৌম্যগুণান্বিতম্ ।

সোমসূনুং সুরারাধ্যং সর্বদং সৌম্যমাশ্রযে ॥ ২॥

বুধং বুদ্ধিপ্রদাতারং বাণবাণাসনোজ্জ্বলম্ ।

ভদ্রপ্রদং ভীতিহরং ভক্তপালনমাশ্রযে ॥ ৩॥

আত্রেযগোত্রসঞ্জাতমাশ্রিতার্তিনিবারণম্ ।

আদিতেযকুলারাধ্যমাশুসিদ্ধিদমাশ্রযে ॥ ৪॥

কলানিধিতনূজাতং করুণারসবারিধিম্ ।

কল্যাণদাযিনং নিত্যং কন্যারাশ্যধিপং ভজে ॥ ৫॥

মন্দস্মিতমুখাম্ভোজং মন্মথাযুতসুন্দরম্ ।

মিথুনাধীশমনঘং মৃগাঙ্কতনযং ভজে ॥ ৬॥

চতুর্ভুজং চারুরূপং চরাচরজগৎপ্রভুম্ ।

চর্মখড্গধরং বন্দে চন্দ্রগ্রহতনূভবম্ ॥ ৭॥

পঞ্চাস্যবাহনগতং পঞ্চপাতকনাশনম্ ।

পীতগন্ধং পীতমাল্যং বুধং বুধনুতং ভজে ॥ ৮॥

বুধস্তোত্রমিদং গুহ্যং বসিষ্ঠেনোদিতং পুরা ।

যঃ পঠেচ্ছৃণূযাদ্বাপি সর্বাভীষ্টমবাপ্নুযাত্ ॥ ৯॥

ইতি বুধস্তোত্রং সম্পূর্ণম্ ।

Encoded and proofread by KSR Ramachandran ramachandran\—ksr at yahoo.ca

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

Budha Stotram Lyrics in Bengali PDF
% File name : budhastotram.itx
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : KSR Ramachandran ramachandran_ksr at yahoo.ca
% Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca
% Description-comments : From Grantha/Tamil book Adityadi Navagraha Stotra
% Latest update : June 28, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website